# Shri Ganesha Ashtottarashatam or shatakam

# શ્રીગણેશાષ્ટોત્તરશતં અથવા શ્રીગણેશશતકમ્

## Document Information

Text title : Mahaganapati Kavacham

File name : gaNeshashatakam.itx

Category : ganesha, kavacha

Location : doc_ganesha

Proofread by : Sreenivasa Rao Bhagavatula

Description-comments : From stotrArNavaH 01-10

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

Shri Ganesha Ashtottarashatam or shatakam

# શ્રીગણેશાષ્ટોત્તરશતં અથવા શ્રીગણેશશતકમ્

## શ્રીમઙ્ગલાશંસનપદ્ધતિઃ

કલ્યાણં કલયન્તુ મે ગણપતેઃ પાદારવિન્દોદ્ધતાઃ
પુણ્યાઃ પાંસુકણાઃ સુરેન્દ્રમકુટીકોટીરકોટીતટે ।
(૧)કાશ્મીરન્તિ કઠોરપાપપટલીકાન્તારસમ્પ્લોષણે
(૨)દાવીયન્તિ ચ યેઽન્તરાયશિખરિવ્રાતે (૩)પવીયન્તિ ચ ॥ ૧॥

વિઘ્નવ્રાતવનાનલો ગણપતિર્વિઘ્નક્ષપાભાસ્કરો
વિઘ્નપ્રાવૃડ્(૪)ઉપેન્દ્રબોધસમયો વિઘ્નપ્રપાતાશનિઃ ।
વિઘ્નક્ષોણિરુહપ્રચણ્ડપવનો વિઘ્નગ્રહોચ્ચાટનો
વિઘ્નવ્યાધિમહૌષધિર્વિજયતે વિઘ્નસ્મરે(૫)શાનદૃક્ ॥ ૨॥

વિઘ્નાદ્રિવ્રજપક્ષતક્ષણપવિં વિઘ્નાબ્ધિકાલાનલં
વિઘ્ના(૬)ચ્છચ્છદવાર્ષિકામ્બુદતતિં વિઘ્નાસુરાબ્જેક્ષણમ્ ।
વિઘ્નાભેદ્યતમઃપ્રભાતસમયં વિઘ્નાલિમુસ્તાકિટિં
વિઘ્નાહિવ્રજવૈનતેયમનિશં વિઘ્નાધિપં સંશ્રયે ॥ ૩॥

વિઘ્નાનલતોયવૃષ્ટિરનઘો વિઘ્નેભકણ્ઠીરવો
વિઘ્નેન્દ્રારિસુદર્શનાચિતપદો વિઘ્ને(૭)ત્વરીચન્દ્રમાઃ ।
(૮)વિઘ્નેર્માલ્યમૃતાક્તવર્તિ ર(૯)નઘા વિઘ્નેક્ષુદન્તાવલો
વિઘ્નેન્દિન્દિર(૧૦)ચમ્પકો ભવતુ મે વિઘ્નેશ્વરઃ શ્રેયસે ॥ ૪॥

વન્દે કલ્પકવિઘ્નરાજમનિશં તં દેહિનામાશ્રયં
યં દેવાઃ શરણં સમેત્ય સકલં વિન્દેયુરાશંસિતમ્ ।
મન્દેહોઽપિ યદાશ્રયાન્મધુઝરીસન્દેશસન્દાયિનીં
સન્દેહેન વિના લભેત સરસાં મન્દેતરાં સાહિતીમ્ ॥ ૫॥

પારં સંસૃતિસાગરસ્ય જગદાધારં ચ સચ્ચિત્સુખા-
કારી નિર્મલયોગિવૃન્દહૃદયાગારં વિકારોજ્ઝિતમ્ ।

ધીરં વાઞ્છિતપૂરપૂરણમહોદારં સદા સજ્જનો-
ત્તારં વારિજ વિશ્વરાદિવિનુતં હેરમ્બમીડે વિભુમ્ ॥ ૬॥

વન્દારુત્રિદશેશ્વરપ્રભૃતિભિર્વૃન્દારકૈરઞ્ચિતં
મન્દારપ્રસુખામરદ્રુસુમનોવૃન્દાવભાસ્વત્કરૈઃ ।
મન્દાનાં મતિદં ગણેશમરિષટ્કં દારયન્તં સતાં
(૧૧)કન્દાત્મેતિ જગત્તરોરધિગતં વિન્દામહે સામ્પ્રતમ્ ॥ ૭॥

ભિન્દાનં વિશયં મહોપનિષદાં છિન્દા નિન્દાદસન્દેહતોઽ-
હં દારા વસુ નન્દના ઇતિ ચિરાત્ સન્ધાનિતં દારુણમ્ ।
છિન્દાનં ભવપાશમાશ્રિતજનાનન્દાતિસન્ધાયિનં
વિન્દામો ગણનાથમદ્વયચિદાનન્દાતિતુન્દાયિતમ્ ॥ ૮॥

ચિત્તે સર્વમિદં વિધાતુમનુસન્ધત્તે વિધત્તેઽથ યત્
ધત્તે યત્ર જગચ્ચિરાદપિ તિરોધત્તેઽપવૃત્તે યુગે ।
સત્તેયં જગતઃ સ્વતો ન હિ યદાયત્તેતિ જોઘુષ્યતે
તત્તેજઃ સતતં વિભાતુ હૃદિ મે મત્તેભવક્ત્રાભિધમ્ ॥ ૯॥

નાકાધીશસુરેશકેશવશિવાદ્યાકારભેદાશ્રયા-
ચ્છોકામ્ભોનિધિમગ્નભક્તજનતાનૌકાયમાનઃ સ્વયમ્ ।
રાકાયામવતીશકોટિઘટનાનીકાશનેજપ્રભઃ
કોકારાતિકલાધરોઽવતુ સુરાનીકાધિરાજાગ્રજઃ ॥ ૧૦॥

॥ ઇતિ શ્રીમઙ્ગલાશંસનપદ્ધતિઃ ।

Footnote

(૧. કાશ્મીરપુષ્પમિવ લસન્તિ
૨. વનહુતાશન ઇવાચરન્તિ ૩. વજ્રાયન્તે
૪. ઉપેન્દ્રબોધસમયઃ-શરત્ વર્ષાન્ત ભવા
૫. ઈશાનહક્-ઈશતૃતીયનેલં
૬. અચ્છચ્છદો—હંસઃ ૭. ઇત્વરી-સ્વૈરિણી
૮. વિનેરમ્મદશારદાપ્તિદિવસો, વિને લિવિરોપણામૃતસિચિઃ ।
ઈમે-વ્રણમ્ । ૯. મલા ૧૦. ઇન્દિન્દિરઃ ભ્રમરઃ)
૧૧. વિન્દામો વિવિધપ્રપશ્ચલવલીકન્દાયિતં સન્તતમ્ ।)

## શ્રીવિનયપ્રપઞ્ચનપદ્ધતિઃ

કલ્યાણાદ્રિમુદક્ષિપત્ સ્વબલસાફલ્યાય યા પુષ્કરાત્
કુલ્યાતુલ્યતયાપિબજ્જલધિમાવલ્યા સુરાણાં નુતા ।
તુલ્યાન્યા ન યતઃ શ્રિતાર્થિકૃતવાત્સલ્યા કચિદ્દેવતા
કલ્યા વર્ણયિતું કથં વયમિમાં શલ્યાપહાં દેવતામ્ ॥ ૧૧॥

મોચાગર્વહરા નવામપિ સુધાં નીચામથાતન્વતી
વાચા ફાણિતશર્કરેક્ષુરસમાધ્વીચાતુરી નિઘ્નતી ।
જાચામત્યખિલં ન યસ્ય ચરિતં પ્રાચામનીચાપિ ચેત્
કા ચાત્યલ્પમતેર્મમાસ્ય ગદિતું ધીચાપલં કેવલમ્ ॥ ૧૨॥

નાયાનામધિપોઽપિ યસ્ય ગદિતું ભોગાવલિં નાશકત્
ભોગાનાલિખિતું કરૈર્દિનમણિઃ ખેગાધિપો વીક્ષિતુમ્ ।
કો ગાહેત પરો ગણેશચરિતાખ્યાગાધપાથોનિધિં
વાગાશાત્ર મમોદિતા યદિ તદા સાગા ભવેયં ન કિમ્ ॥ ૧૩॥

મર્યાદાગ્રથિતો વિનૈવ જલધિસ્તર્યા ન સન્તીર્યતે
ચર્યા ત્વસ્ય ન તાદૃશી કલિતમૌખર્યશ્ચ આદયઃ ।
પર્યાપ્તા ન ગણેશિતુર્નિઙ્ગભવૈસ્વયોઽપિ ધુર્યાઃ સુરાઃ
પર્યાયાદ્ગદિતું કથં નુ વિષયીકુર્યામહન્તામહમ્ ॥ ૧૪॥

માનાતીતગણેશમઙ્ગલગુણાખ્યાનાવધાનાહત-
જ્ઞાનાભાસવિચેષ્ટિતં કિમપિ દુર્માનાભિમાનાહિતમ્ ।
મેનાપત્યતનૂજપાદકમલધ્યાનાભિધાં નિષ્કૃતિં
ભૂનાકિપ્રવરા વિધાય તનુતાનેનાશુ હીનાગસમ્ ॥ ૧૫॥

સ્કન્દાગ્રેજનુષોઽભિનન્દિતુમિમે કુન્દાવનાતં યશો
વિન્દાનાઃ સનકાદયોઽપ્યમૃતનિષ્યન્દાયિતૈમ્ભિરૈઃ ।
મન્દાક્ષપ્રતિરુદ્ધસુન્દરવચઃસ્પન્દા ન શેકુઃ કથાં
મન્દાત્માન ઇમે કથં ગણપતે વિન્દામહે સામ્પ્રતમ્ ॥ ૧૬॥

મિત્રાણ્યત્ર વિચિત્રબન્ધુનિવહાઃ પુત્રાઃ કલત્રાણિ વા
યત્રાયાસ્યતિ તત્ર કોઽપિ ન પુનઃ સત્રાસમાયાસ્યતિ ।
દ્વિત્રા યે ગદિતા ગુણા ગણપતેરત્રામુના ભક્તિતો
જિત્રાસ્તે સ્યુરમુત્ર તસ્ય તુ ધુરીત્યત્રાભિયુક્તા વયમ્ ॥ ૧૭॥

(૧)વ્યાસાદ્યા અપિ યસ્ય નાલમભવન્ દાસા ગુણાનામુપ-
ન્યાસાયાન રતા વયં બત પરીહાસાય ભાસામહે ।
પ્રાસાય સ્પૃહયાલુના સ્વધિષણાયાસાત્ સમાસાદિતં
ત્રાસાપેતમિદં મહાગણપતે ધીસાહસં ક્ષમ્યતામ્ ॥ ૧૮॥

પદ્યાન્યદ્યતનાનિ યદ્યપિ ન સાવધાનિ વિદ્યાવતાં
હૃદ્યાનિ સ્યુરથાપિ ચેતસિ સતાં દદ્યાન્મુદં મત્કૃતિઃ ।
યદ્યાયાત્યુદધિં કદમ્બુસ્તિતિનદ્યા સહાવાપ્તવૈ-
શદ્યા સ્યાત્ ત્રિદિવૌકસાં પરિષદા દદ્યાદતશ્ચામૃતમ્ ॥ ૧૯॥

એષા યદ્યપિ મત્કૃતિર્ન વિદુષાં તોષાય દોષાધિકા
જોષાવસ્થિતિતો વરા હિ ફણિતિર્ભાષાવિશેષાન્વિતા ।
યોષાણાં પતિભક્તિરેવ હિ પરા ભૂષાન્યદોષાપહા
મોષાયાપ્યગુણસ્ય મે ગણપતેરેષા મનીષા પદે ॥ ૨૦॥

॥ ઇતિ શ્રીવિનયપ્રપઞ્ચનપદ્ધતિઃ ।

Footnote

(૧। મનિશાભ્યાસાદનાયાસતો યે સાહિત્યસમુદ્રપારગધિયો વ્યાસાદયો મન્વતે । ? ?
કિયત્ કિયદુપન્યાસાન્મહાસાહસં
કોઽસાવસ્મિ ગણાધિનાથચરિતે મત્યા તુ તસ્યાક્ષમઃ ।)

## શ્રીમનોનિયમનપદ્ધતિઃ

માતઙ્ગાનનમાર્તરક્ષણચણં માતઙ્ગકન્યાસુતમ્ ।
માતઙ્ગાહિતનન્દનં ઘનતમોમાતઙ્ગકણ્ઠીરવમ્ ।
માતઙ્ગાન્તવિભૂતિદાનનિપુણં માતઙ્ગવિદ્વિસ્થિતં
મા તં ગાઃ પરિહત્ય મામકમનોમાતઙ્ગ મા ચાપલાત્ ॥ ૨૧॥

અધ્યાસીનમધીક્ષુસાગરસભામધ્યાન્યસિંહાસનમ્ ।
સિદ્ધ્યા પાદવિભૂષિતાઙ્ગુતલયા બુદ્ધ્યા ચ સંસેવિતમ્ ।
વિધ્યાચારપરાયણાનવિરતં સ્વાધ્યાનનિષ્ઠાન્ જનાન્
ઋદ્ધ્યા યોજયિતારમાશુ શરણં કુધ્યાખુવાહં મનઃ ॥ ૨૨॥

વેદ્યં વેદશિરશ્શતૈસ્ત્રિજગતામાદ્યં તપોભિઃ સમા-
યાસં સંસૃતિઘોરરોગસુમહાવૈદ્યં સુરાદ્યશ્રિતમ્ ।

આધન્તાપગતં મુનીન્દ્રહૃદયાસ્વાદ્યં સમાલમ્બતાં
માદ્યન્તી વિષયૈર્મતિર્દિનકરાભેદ્યં વિભેત્તં તમઃ ॥ ૨૩॥

વિમ્બોત્સેકહરાધરાત્મદયિતાબિમ્બોકબદ્ધસ્પૃહં
કમ્બોરપ્યતિશુભ્રદન્તમખિલાલમ્બોદયં યં મનાક્ ।
સમ્બોધ્યૈવ નરઃ સમસ્તસુખભાક્ સમ્બોભવીતિ ક્ષણાત્
તં બોધૈકસુધાનિધિં ભજ મનો લમ્બોદરં સાદરમ્ ॥ ૨૪॥

ગન્ધર્વાધિપતિ ગોરપચિતાવન્ધ્યત્વસમ્ભાવના-
ગન્ધપ્રાપિતભીમનક્રજનુષાપ્તં ધર્મમપ્યાચરન્ ।
રુન્ધન્ યત્પદમસ્ય સઙ્ગતિવશાત્ સ્વં ધન્યતામાનયન્
બન્ધચ્છેદમવાપ તત્પદયુગં સન્ધત્સ્વ ચેતઃ સદા ॥ ૨૫॥

અમ્બે દ્વે ચરણે શ્રયાશુ ધિષણે સ્તમ્બેરમસ્યાખિલા-
લમ્બે નાન્યદિતીવ પુષ્કરશિખાલમ્બેન સંસૂચિતે ।
બિમ્બે સ્વાદુતરે નવોષ્ણમહસો બિમ્બેન તુલ્યે ચરન્
લમ્બેત્ કિં બત કાકલોકકલિતાલમ્બે શુકઃ પલ્લવમ્ ॥ ૨૬॥

નાલીકાસનવાસવાદિદિવિષન્મૌલીડ્યકલ્પદ્રુપુ-
ષ્પાલીગર્ભદલાન્તરાલવિગલદ્ધૂલીમધૂલીભૃતમ્ ।
કેલીલોલવિશાલકર્ણયુગલીતાલીધુતાલીવ્રજૈ-
ર્વાલીઢં કરટોદ્ધતૈર્ભજ મનો કાલીસુતાઙ્ઘ્રિદ્વયમ્ ॥ ૨૭॥ shloka same as 48

કારામન્દિરસન્દિતાઃ કિલ સુનાસીરાદિમાઃ ખેચરાઃ
વીરાગ્રેસરસિન્ધુદૈત્યહતયે સારાધિકં યં પુરા ।
આરાધ્યાપુરભીપ્સિતં વિવિધસ્વસંસારબન્ધચ્છિદં
મારારાતિતનૂભવં શ્રય મતે ધીરં મયૂખાધિપમ્ ॥ ૨૮॥

કોટીરન્તિ મહાહયો મણિતુલાકોટીભવન્તીતરે
શાટીયન્ત્યપરે ત્વચા ? ધૃતજટાજૂટીગુણન્ત્યલ્પકાઃ ।
પાટીરાન્તિ રિપોરસૃઞ્જિ વિબુધાશ્ચટીભવન્તિ સ્વતઃ
કીટીયન્ત્યસુરાઃ સ યસ્ય ગણરાડાટીકતાં ચેતસિ ॥ ૨૯॥

વારં વારમહર્નિશં ભુવિ નૃણામારઞ્જનં યત્નતઃ-
કારં કારમલમ્ભિ કિં નુ સચમત્કારં ફલં જન્મનઃ ।
સારં યત્સકલાગમોપનિષદાં દૂરં દુરીહાવતાં
સ્વૈરં સંશ્રય મૂર્ધ્નિ દર્શિતગજાકારં મનીષે મહઃ ॥ ૩૦॥

॥ ઇતિ શ્રીમનોનિયમનપદ્ધતિઃ ।

## શ્રીનિર્વેદપદ્ધતિઃ

મા ગા માનસ કર્મ કાપથમુરોભાગાવગાઢસ્તના-
ભોગામર્ત્યવધૂવિચિત્રતરસમ્ભોગાખ્યસૌખ્યપ્રદમ્ ।
યોગાયાભિરતાઃ પરે ખલુ મહાભાગા વયં નેહશાઃ
દ્રાગાશાપરિપૂરકં ગણપતિં નાગાનનં સંશ્રય ॥ ૩૧॥

માતેયં મહિલાપિ તેઽતિજડસઙ્ઘાતેઽત્ર ભૂતેન્દ્રિયૈઃ
પૂતે મા મમતેતિ હન્ત બહુધાધીતેઽપ્યવીતેક્ષણઃ । (બહુધાગીતે)
નીતે નિષ્ફલતાં વયસ્યસિ પરાભૂતેઃ પદં દ્રાગ્ભવે
શીતે નીત ઇવાવૃતિર્ગિરિસુતાપોતે કદા સ્યાન્મતિઃ ॥ ૩૨॥

ધ્યેયં યોગિભિરન્તરબ્જકુહરે જ્ઞેયં ત્રયીમસ્તકૈ-
ર્ગેયં સિદ્ધસુરાસુરૈરપગતાપાયં વિધેયં સતામ્ ।
સાયં સાગરસમ્પતદ્રવિસમચ્છાયં વિમાયં સદા-
ધ્યાયં ધ્યાયમુમાસુતં ગતમલપ્રાયં કદા સ્યાન્મનઃ ॥ ૩૩॥

નિત્યાનિત્યવિચારલેશવિકલઃ સત્યાપચિત્યાન્વિતઃ
કૃત્યાકુત્યપરિગ્રહે તુ મનસો વૃત્ત્યા પ્રવૃત્તઃ સ્વયમ્ ।
નત્યા કેવલયા ગણેશ ન મનઃસ્થિત્યા ચ ભૃત્યાયિતો
મૃત્યાવન્તિકગે કયા પુનરહં મત્યા તરેયં ભવમ્ ॥ ૩૪॥

ક્ષોણાવર્થપરાયણાનવનિપાન્ હૂણાદિમાનાશ્રયન્
ઋણાભાષણભૂષણૈવત પરિક્ષીણાયુરપ્યન્તતઃ ।
રેણાવપ્યમુતઃ ફલે નસુલઝે હીણાશયોઽધાપ્યનિ-
દ્રાણાવાશ્રિતરક્ષણે ન ચરણૌ ગાણાધિપાવાશ્રયે ॥ ૩૫॥

બુદ્ધ્વા તત્ત્વમનેકદેશિકગિરામધ્વાનુસારાચ્ચિરા-
દિવાનીનભિતો વિવિક્તવિષયે બવાસનં મારુતમ્ ।
રુદ્ધ્વા હૃત્કમલોત્થરશ્મિનિચયેન ધ્વાન્તરઙ્ગાનં
વિદ્ધ્વા તત્ર ગણેશ્વરાનુભવજ મધ્વાપિબેયં કદા ॥ ૩૬॥

દીનં સર્વગુણૈઃ કદાપ્યકલિતધ્યાનં શિવાનન્દન-

વીનં માનમદાદિભિઃ પ્રચુરિતાજ્ઞાનં દધાનં સદા ।
એનં કેવલમાત્મનો વિદધતં (વેનં સમાનં) વેનોપમાનં ગુણૈઃ
સ્વાનન્દં ગમયેત્ કથં ગણપતિર્દૂનં ભવાબ્ધેઃપરમ્ ॥ ૩૭॥

દુર્વારસ્મયદુર્ભરાસુરવરાખર્વાયિતૌજોશુજા-
ગરસ્કિન્દિતસાર્વલૌકિકવિપન્નિર્વાપણે ધૂર્વહમ્ ।
અર્વાચીનવચોવિચારવિભવાન્નિર્વાચ્યતેજોભરં
શર્વાણીતનયં ભજેઽહમનિશં સર્વાપદુચ્છિત્તયે ॥ ૩૮॥

યલ્લાલેખિતમબ્જજેન યદતિક્ષુલ્લાત્મકં મે ધનં
તલ્લાભઃ સ કિયાનતઃ કરટવન્મલ્લાકૃતિઃ સામ્પ્રતમ્ ।
બલ્લાલાભિધયા વસન્ બલિપુરે ફુલ્લં ચિરપ્રોલ્લસ-
દ્બુલ્લાતાત્મકલેવરોઽતિવિપુલામુલ્લાસયાશુ શ્રિયમ્ ॥ ૩૯॥

સ્ફારાકારધરાધરાધરજગદ્ભારાદ્રિનિર્ગત્વરૈ-
સ્તારાન્તર્ગતમૌક્તિકૈરિવ નખૈરારાદુપારઞ્જિતૌ
ધીરાવાશ્રિતરક્ષણેઽબ્જયુગલાકારાવરાતિષ્વતિ-
ક્રૂરાવત્યરુણૌ ગણેશચરણાવારાધયામો હૃદિ ॥ ૪૦॥

॥ ઇતિ શ્રીનિર્વેદપદ્ધતિઃ ।

## અથ શ્રીવૈરાગ્યપદ્ધતિઃ ।

યો માનેન મદેન મુગ્ધહૃદયો હેમાદિના વા નરો (વા માનવો)
નામાપ્યસ્ય કદાપિ ન સ્મર સકૃત્ ક્ષેમાય હે માનસ ।
સીમાપેતગુણાકરં ગણપતિં સોમાર્ધચૂડામણિં
કામાતીતફલપ્રદાનનિપુણં ભૂમાનમેવાશ્રય ॥ ૪૧॥

વિત્તાત્ પ્રાક્તનજન્મપુણ્યશકલાયત્તાદપિ ક્ષુલ્લકા-
ન્મત્તા યે મનુજા ન તાન્ વયમમી વૃત્તાવપેક્ષામહે ।
તત્તાદૃક્કરુણાકટાક્ષમહિમાયત્તોહમિચ્છાતિગાં
વિત્તાધીશસખાત્મજો મમ સદા દત્તામભિત્તાં શ્રિયમ્ ॥ ૪૨॥ (દત્તામખણ્ડાં)

કાલં દૈત્યકુલસ્ય દેવપરિષત્પાલં દયાલું ફણિ-
પ્રાલમ્બાઞ્ચલલમ્બિ મઞ્જુલમણીમાલં સલીલં નિજે ।
લોલં ગણ્ડતલે નુદન્તમસકૃલ્લોલમ્બજાલં જગ-

ન્મૂલં દૂરનિવારિતાશ્રિતજનાભીલં ગણેશં નુમઃ ॥ ૪૩॥

કાર્યાકાર્યવિચારણાં વિજહતા નાર્યાદિષુ ભ્રામ્યતા
નાર્યાચારકૃતા સ્થિતેન વિબુધાચાર્યાદૃતે દુર્મતે । (વિબુધાચાર્યાહિતે)
ધૈર્યાદ્ દુશ્ચરિતં મયાન્વહમહોઽકાર્યાત્મને દ્રુહ્યતા
સૂર્યાપત્યજભીઃ કથં ગણપતેસ્તાર્યા કથામન્તરા ॥ ૪૪॥

ધીહાન્યાસકૃદાર્જિતં મહદઘં મોહાન્મુહુઃ શીલિતં
દેહાત્મભ્રમતઃ પુનર્બહુવિધદ્રોહાદપારીકૃતમ્ ।
સ્વાહાનાથવદુપ્રતાપજનકં હા હા કથં તં સહે
દેહાતિ નરકોદ્ભવં ગણપતેરીહા પદાબ્જે ન ચેત્ ॥ ૪૫॥

અન્યાયોપગતાલ્પવિત્તમહિતમ્મન્યાનવન્યાં મૃગા
વન્યા મિત્રમરીચિકામિવ મહોદન્યાઃ સદોપાસતે ।
ધન્યા એવ વયં ભવેમ યદિ નસ્તન્યાદુમાનન્દનો
વિન્યાસં નયનાઞ્ચલસ્ય ન તતો મન્યામહેઽન્યાં શ્રિયમ્ ॥ ૪૬॥

કાદાચિત્કસુખાવહાલ્પવિષયાસ્વાદાય ગોદારણા- (ગોદારણાનિ - હલાનિ)
ન્યાદાયાત્ર રતઃ ફલૈર્વિરહિતઃ કૈદારિકે કર્મણિ ।
પાદાવાશ્રયતેઽથ ચેદ્ગણપતે ર્દાસ્યતઃ સ્વકામમિ-
ત્યાદાવેવ કુતઃ શ્રયેન્ન મતિમાન્ ખેદાનપાસ્યેતરાન્ ॥ ૪૭॥

નાલીકાસનવાસવાદિદિવિષન્મૌલીડ્યકલ્પદ્રુપુ- shloka same as 27
ષ્પાલીગર્ભદલાન્તરાલવિગલ દ્ધૂલીમધૂલીભૃતમ્ ।
કેલીલોલવિશાલકર્ણયુગલીતાલીધુતાલીવ્રજૈ-
ર્વાલીઢં કરટોદ્ગતૈર્ભજ મનો કાલીસુતાઙ્ ઘ્રિદ્વયમ્ ॥ ૪૮॥

પઞ્ચાનાં વિયદાશુગાઞ્યુદભુવાં સઞ્ચારિણાં સઞ્ચયે (સઞ્ચારિણીનાં ચયે)
ચિઞ્ચાતુલ્યકલેવરેઽત્ર હૃદય ત્વં ચાપલં મા કૃથાઃ ।
મુઞ્ચાહન્તાં ચ મમતાં જડાત્મનિ કિઞ્ચાદ્વયં ચિન્મયં
સ્વં ચામું ચ ગણાધિનાથમપૃથક્ કિન્ત્વાત્મના ચિન્તય ॥ ૪૯॥

ભૂતસ્તોમમયં શરીરમયિ મા ચેતઃ સ્થિરં ચિન્તય
ખ્યાતસ્તસ્ય લયો યથા હિ બદરીમૂતસ્ય બન્ધાત્યયે ।
ભ્રાતર્ન સ્મર નશ્વરં દિશતિ યઃ પ્રીતઃ પદં શાશ્વતં
જાતપ્રીતિરુપાશ્રયાશુ ગિરિજાપોતસ્ય પાદામ્બુજમ્ ॥ ૫૦॥

॥ ઇતિ શ્રીવૈરાગ્યપદ્ધતિઃ ।

## શ્રીસ્વરૂપપદ્ધતિઃ

સવ્યાઙ્કસ્થિતયા સ્વયા દયિતયા નિર્વ્યાજકારુણ્યયા
ભવ્યામ્ભોરુહવક્ત્રયા સરસયા સવ્યાજમાલિઙ્ગિતઃ ।
નવ્યાશોકદલાતિમઞ્જુલતનુચ્છવ્યા ભવવ્યાધિહા-
હાશાધિપવન્દિતઃ સપદિ મામવ્યાદુમાનન્દનઃ ॥ ૫૧॥

નારીમતલે દધાનમખિલાધારીભવન્તી ધૃતિં
સૂરીન્દ્રૈઃ સનકાદિભિર્નુતગુણં હારીભવદ્ભોગિનમ્ ।
સ્ફારીભૂતકરાઞ્ચલેન દનુજં ગૌરીગૃહં ચારુ સિ-
ન્દૂરીકૃત્ય વિચર્ચિતાખિલતનું નારીગણેશં ભજે ॥ ૫૨॥

શુણ્ડાદણ્ડગૃહીતદન્તમુસલોચણ્ડાભિઘાતોદ્ધતૈ-
શ્ચણ્ડાંશુપતિતૈઃ સુરાલયમણીષણ્ડાર્જિતૈર્યઃ કણૈઃ ।
પિણ્ડાલતકમાકલય્ય શશિનઃ ખણ્ડામૃતેનાત્મન-
શ્ચણ્ડાતં રમણીમણેરકૃત વેતણ્ડાનનઃ પાતુ નઃ ॥ ૫૩॥ (પાતુ સઃ)

વામં ભૂમિતલે નિધાય ભુવનક્ષેમં દિશન્તં સદા
શ્રીમન્તં પરમુન્નમય્ય ચરણં કામં નટન્તં મુદા ।
સોમં શેખરિતાચ્છકૈતકદલક્ષામં દધાનં બહુ-
વ્યામં પન્નગભોગનિર્મલતરક્ષૌમં વસાનં ભજે ॥ ૫૪॥ (ગણેશં ભજે)

એલાગન્ધિમદામ્બુચુમ્બિમધુલિણ્માલાપનોદોદ્યતં
સ્થૂલાત્મીયકપોલમણ્ડલચલત્તાલાનુકારિશ્રુતિમ્ ।
હેલાક્ષિપ્તગિરીન્દ્રજાસ્તનતટીચેલાઞ્ચલં ચારુ શુ-
ણ્ડાલાપીતપયોધરં ગણપતિં બાલાકૃતિં ભાવયે ॥ ૫૫॥

ફાલાક્ષસ્ય શિરસ્થમયતટિનીવેલાસ લીલાવશાત્
કૂલાઘાતવિહારલોલશિરસા કાલારિણા વારિતઃ । (વિલાસલોલશિરસા)
આલાપાનપરિસ્ફુટાક્ષરપદાન ખેલાવશાદુગિરન્
લાલામૌક્તિકમણ્ડિતોઽવતુ ગણેટ્ બાલાબ્જમૌલિઃ શિશુઃ ॥ ૫૬॥

આજાનોજ્વલપદ્મરાગનિકરૈરોજાયમાનં જવાત્
બીજાપૂરધિયા સુમેરુમહરદ્યો જાતમાત્રઃ પુરા ।

મા જાનાહિ ફલં ત્યજામુમિતિ તત્યાજાદ્રિરાજાત્મજા-
પૂજાપૂર્વવચોભરૈરવતુ માં રાજાર્ધમૌલિર્વિભુઃ ॥ ૫૭॥

(૧)ચણ્ડીશાત્મભવો ગિરામથિતમત્સ્યણ્ડીમદશ્ચણ્ડપા
ષણ્ડીયપ્રકરાપહોઽમૃતધુનીડિણ્ડીરપાણ્ડુપ્રભઃ ।
ભિણ્ડીપાલમુખાયુધૈરરિશિરઃખણ્ડીકૃતૌ પણ્ડિતો
દુણ્ડી રાજતિ વારણાસિપુરિ વેતણ્ડીયતુણ્ડઃ પ્રભુઃ ॥ ૫૮॥

માતા યસ્ય નગાધિરાજતનયા ખ્યાતા પિતા શઙ્કરો
ભ્રાતાશેષસુરાધિરાજપૃતનાનેતા હતારિવ્રજઃ ।
ગીતા યસ્ય કથા નિર્જેન્દુવદનાનાતાનપેતૈઃ સુરૈ-
ર્નીતા ગેયપદં સદા ભવતુ સન્ત્રાતા સમેતાપદઃ ॥ ૫૯॥

ક્ષામાત્યુજ્જ્વલફાલમૂલકલિતશ્યામાભિકો ભાસ્કર-
સ્તોમાહઙ્કૃતિમોચકામિતમહસ્થેમાભિરામાકૃતિઃ ।
વામાઙ્કસ્થિતવલ્લભાખ્યદયિતાનામાઙ્કનામા વિભુ-
ર્મામાનન્દયતુ સ્વભક્તનિહિતપ્રેમા સ સોમાત્મજઃ ॥ ૬૦॥

॥ ઇતિ શ્રીસ્વરૂપપદ્ધતિઃ ।

Footnote

૧. ચણ્ડીશપ્રથમાત્મજં મધુરમત્સ્થણ્ડીય ખણ્ડીભવ
ઝુણ્ડીતિ પ્રથિતાખ્યયાવપટલીપણ્ડીકૃતા દક્ષિણમ્ ।
ભિણ્ડીપાલમુખાયુધૈર્નિહતપાષણ્ડીયષણ્ડ
સ્તણ્ડીત્યાદિમુનીડિતં કલિતવેતણ્ડીયવક્ત્રં ભજે ॥

## શ્રીગુણાનુવર્ણનપદ્ધતિઃ

પાકારાતિમુખામરેડ્યચરિતં નાકારિવર્ગચ્છિદં
સ્તોકાત્મીયજનાભિપૂજનવિધિસ્વીકારતુષ્ટાશયમ્ ।
તોકાકારમૃષેઃ સુરેન્દ્રલલનાલોકાભિગીતામિત-
શ્લોકામેયગુણં ભજેમ સદયાલોકાવિતાર્થિવ્રજમ્ ॥ ૬૧॥

દોર્ભિઃ સ્વૈર્દશભિર્ધૃતાયુધ વિભો ગીર્ભિર્મુનીન્દ્રૈઃ
કૃતા-
શીભિઃ સન્નુત દીનરક્ષણમહાધૂર્ભિર્બૃહત્કન્ધર ।

નૌભિન્લા જલધૌ યથૈવમતગતેભિઃ પરીતા દયા-
પૂર્ભિર્દૃષ્ટિભિરેવ દેવ વિષયાભિન્ધિ સિન્ધુદ્વિષન્ ॥ ૬૨॥

દમ્યામિન્દ્રિયસન્તતિં સપદિ સંયમ્યાન્તરબ્જં સમુ-
નમ્યાસ્મિન્ સનકાદિયોગિપરિષદ્રમ્યાભિગમ્યા સતામ્ ।
કૃસ્યાદ્યજભવાન્તસર્વજનિમન્નમ્યાસ્તુ મે શ્રેયસે
શમ્યા પૂજયતામભીષ્ટવરદા રમ્યા પરા દેવતા ॥ ૬૩॥

સત્યં બ્રહ્મ સનાતનં શ્રુતિશિરઃસ્તુત્યં મુનીન્દ્રહૃદા
નિત્યં ધ્યેયમધીનુવારિધિસભં નૃત્યં વિતન્વત્ સદા ।
ચિત્યંશે સદૃશેઽપિ યત્ કિલ પરાગિત્યંશભેદાસ્પદં
પ્રત્યઞ્ચં વિદધાતુ માં પ્રકૃતિવૈકૃત્યંશમુક્તં ચિરાત્ ॥ ૬૪॥

તાતોઽબ્ધેરુદિતં વિષં નનુ પિબન્ ખ્યાતોરુહાલાહલં
ગીતોઽભૂદખિલૈરિતીવ સ યતો જાતોઽયમેવાધુના ।
(?) વાતોચ્ચાલિતવીચિચુમ્બિતનભાઃ સ્ફીતો વિષાણાં નિધિઃ
પીતો યેન તમાશ્રયે મમ સદા નાતોઽન્યદૈવં ક્વચિત્ ॥ ૬૫॥

કાનીનેન સહારચય્ય સમયં મૌનીશ્વરેણાક્ષરામ્ ।
ધાનીકૃત્ય રદં નિજં કટમદોદાનીરયન ઘોસદા ।
(૨) સ્થાનીભૂતગિરેસ્તટેઽલિખત યો માની મહાભારતં
યાનીમં શરણં શ્રિતાર્થિજનસન્તાનીભવન્તં વિભુમ્ ॥ ૬૬॥

અન્યાશક્યવિનિગ્રહી સમિતિમૂર્ધન્યાવિમૌ દાનવૌ
હન્યાદેવનરાન્તકાવિતિ સુરૈર્મુન્યાદિભિર્નાર્થિતઃ ।
નન્યાયાભિમુખૌ જઘાન ગદયાશન્યા યથેન્દ્રો ગિરીન્
તન્યાદેષ મહોત્કટઃ શુભમિહાનન્યાશ્રયસ્યાશુ મે ॥ ૬૭॥

કૃન્તાત્તીક્ષ્ણતરેણ સર્વજગદત્યન્તાર્તિદાન દાનવાન્
દન્તાગ્રેણ મૃગાધિભૂરિવ નખૈર્દન્તાવલાન્ સંહરન્ ।
સન્તાપં જગતાં જહાર જનતાયન્તા નિયન્તા ધિયાં
ભિન્તામેષ ગજાનનઃ સપદિ મે ચિન્તાં દુરન્તામિમામ્ ॥ ૬૮॥

ચીટી યસ્ય પુરન્દરાદિદિવિષત્કોટીભિરભ્યર્ચ્યતે
ખેટીભિચરિતં સુરાવનિરૂહાં વાટીષુ જેગીયતે ।
ધાટી યસ્ય રણેષુ દૈત્યનિવહોત્પાટી ગણેશઃ સ મે
ઘોટીભાવિતમૂષિકોઽઘપટલોચ્ચાટી ભવત્વઞ્જસા ॥ ૬૯॥

પૂષા યન્મહમા જિતોઽનુદિવસં કાષાયમાલમ્બતે
દોષાનાયક એષ યસ્ય મમસરતોષાય ભૂષાયતે ।
આષાઢાન્તરમાશ્રિતં નનુ ભિયા મેષાધિરૂઢં મહઃ (મેષાધિરૂઢં મહઃ - વહ્નિઃ)
શેષાણાં ગણનાયકાનુકરણે કેષાં પરેષાં મહઃ ॥ ૭૦॥

॥ ઇતિ શ્રીગુણાનુવર્ણનપદ્ધતિઃ સમાપ્તા ।

## શ્રીચારિત્રપદ્ધતિઃ

કન્તાવાહિતસાયકે મુનિવધૂરન્તાહિહન્તા મુને-
ગન્તાસીતિ ગિરા સહસ્રભગતાં ચિન્તાકુલોઽભ્યેત્ય યમ્ ।
ક્ષન્તારં સ્વજનાગસાં ગુરુગિરા હન્તારમપ્યહસાં
સન્તાપં વિજહી ભજે ગણપતિં ચિન્તામણિં નામ તમ્ ॥ ૭૧॥

બન્ધૂકસ્તબકારુણં રણમહીગં ધૂલિધૂમ્રાનના-
ભં ધૂમ્રાક્ષવિમર્દન શરગણૈઃ સિન્ધૂત્તમાઙ્ગચ્છિદમ્ ।
અન્ધૂકૃત્ય નિપીય પુષ્કરતટે સિન્ધૂન્ ક્ષિપન્તં શ્રિતા-
ઘં ધૂન્વન્તમશેષમાશ્રય ગણેશં ધૂમકેતું મનઃ ॥ ૭૨॥

માસે ભાદ્રપદે જયોત્તરતિથાવાસેવકેભ્યો નિજા-
વાસે કલ્પિતદિવ્યમોદકભરપાસેન પૂર્ણોદરઃ ।
ન્યાસે પ્રસ્ખલિતઃ પદોઃ કૃતપરીહાસે વિધૌ યઃ સદા
હ્રાસેનામુમયોજયન્મમ રિપુત્રાસે સ સન્નાતુ ॥ ૭૩॥

વારીશોદરસમ્ભૃતાનિ સહસા વારીણિ યઃ પુષ્કરે-
ણોરીકૃત્ય નભસ્થલે કણતયોગારીચકાર ક્ષણાત્ ।
સ્ફારીભૂતમદાન્ દુરાસદમુખાન્યોઽરીરિષદાનવાન્
ભીરીઢારહિતાનસાવુદયતાં પારીન્દ્રવાહો હૃદિ ॥ ૭૪॥

આપાતાલવિસારિતોયભરિતં પાપાશયં યઃ પુરા-
કૂપાકારકૂપારસ્થ મહાસુરં કલિતસન્તાપાતિરેકં નૃણામ્ ।
કોપાદન્તરુદં ચિરાય ગમયન વ્યાપાદયામાસ યઃ
સોઽપાયાનવધૂય પાતુ સતતં નીપાલયાનન્દનઃ ॥ ૭૫॥

રુદ્રાણીભુજમણ્ડલાહિતશિરા નિદ્રામશેષાવનો-

નિદ્રામાશ્રિતનૈજભોગજનિતાં મુદ્રાપયન્ યઃ પુરા ।
છિદ્રાન્વેષણતત્પરં દિવિ જવાદ્વિદ્રાણમધ્યાહનત્
સદાશ્મં ચ મયાસુરં વિતનુતાદ્ભદ્રાણ્યમુદ્રાણિ નઃ ॥ ૭૬॥

છાયાકારમુપાગતં કુહનયા કાયાનુવૃત્તં મહો-
ચ્છાયાદદ્રિતટાત સ્વમુન્મુખમપાધાયાથ દેહં પતન્ ।
આયાસેન વિનાવધીદ્ ગિરિતટે માયાવિનં દાનવં
પાયાદેષ ગણાધિપોઽતિવિષમપ્રાયાદપાયાત્ સ મામ્ ॥ ૭૭॥

ક્ષોણીકોણગતા યદસ્રકણિકાઃ પ્રાણીભવન્ત્યો ધનુ-
બાણીતૂણધરી યથૈવ સ ઇતિ શ્રેણીભવન્તિ સ્મ તમ્ ।
શાણીઘૃષ્ટશરક્ષતદ્વિષદસૃગ્વેણી નિપીયાશુગ
દ્રોણીભિર્વ્યજયદ્રિપૂનવતુ શર્વાણીસુતો નશ્ચિરમ્ ॥ ૭૮॥

વિપ્રશ્રેષ્ઠવરેણ્યગીતનિગમાનુપ્રશ્નસમ્ભાવિત-
સ્વપ્રત્યુક્તિસુધાવ્યમાનસસરોવપ્રક્રિયોલ્લાસિનમ્ ।
અપ્રત્યક્ષપરાત્મભાવવિશયાઘપ્રત્યયોદ્ભાવના-
ઘપ્રક્ષિપ્તિવિહારિણં ગણપતિં ક્ષિપ્રપ્રસાદં ભજે ॥ ૭૯॥

રક્ષાર્થં સુધિયાં દુરીહપરિષચ્છિક્ષાર્થમપ્યેત્ય ય-
સ્થ્યક્ષાપત્યતનું દદાહ દનુજાન કક્ષાનિવોષર્બુધઃ ।
યક્ષાધીશજલેશ્વરાન્તકસુરાધ્યક્ષાન્ રરક્ષાર્દિતાન્
ઋક્ષાધીશકલાધરઃ સ ભગવાન્ રક્ષાપરોક્ષોઽસ્તુ મે ॥ ૮૦॥

॥ ઇતિ શ્રીચારિત્રપદ્ધતિઃ ।

## શ્રીનતિપદ્ધતિઃ

તાલાકરકારાગ્ચલપ્રવિલસચ્છૂલાગ્રભિન્ન દ્વિષ-
સ્ફાલાય ક્ષણચૂક્ષિતાખિલમહીચેલાય લીલાવશાત્ ।
કૂલાઘાતવિશીર્ણમૂલવિચલદ્વેલાચલાય સ્વયં
વ્યાલામયવપુર્ધરાય ગિરિજાબાલાય તુભ્યં નમઃ ॥ ૮૧॥

વીણાતાપસગીયમાનભુવનત્રાણાપદાનાય સ-
ચ્છ્રેણાવર્પિતકામનાવિષયકલ્યાણાય ભૂયો નતિમ્ ।
એણાઙ્કાર્ભકમૌલયે વિતનુમઃ શોણારવિન્દોજ્જ્વલે

પાણાવાહિતમોદકાય સુમનોબાણારિડિમ્ભાય તે ॥ ૮૨॥

હાહાદ્યૈરુપવીણિતાદ્ભુતગુણવ્યૂહાય વૈહાયસૈ-
વ્યોહારૈનિઙ્ગમાન્તગૈર્વિબુધસન્દોહાભિનન્દ્યાત્મને ।
બાહાપઙ્ક્તિશિખોદ્ગલન્મદપરીવાહાનુમિશ્રશ્રવો-
જાહામન્દમરન્દસૌરભલસદ્દેહાય ભૂયો નમઃ (?) ॥ ૮૩॥

રુષ્ટા યા જગદેવ ભસ્મ કુરુતે તુષ્ટા તુ સિદ્ધીર્દદા-
ત્યષ્ટાવપ્યથ યત્પદાબ્જયુગલીજુષ્ટો વિરક્ત્યા યદા ।
હૃષ્ટાસ્મૈ વિતરત્યનન્યસુલભામિષ્ટાં ગતિં શાશ્વતીં
કષ્ટાપાયકૃતે ભજે શ્રુતિશિખોદ્દુષ્ટાં પરાં દેવતામ્ ॥ ૮૪॥

ધર્માધર્મવિવેચનેઽપ્યચતુરો દુર્માર્ગગામી સદા
કર્માપેક્ષફલપ્રદાનનુસરન્ શર્માપ્નુયાં કિં કદા ।
નર્માલોકનમાત્રતોઽસ્તદુરિતં નિર્માય સર્વાર્થદં
ધર્માર્તોઽભ્રમિવ વ્રજામિ શરણં ભર્માદ્રિચાપાત્મજમ્ ॥ ૮૫॥ (ભર્મ - હેમ)
વિન્ધ્યાદ્રિસ્મયહારિણા ઘટભુવા વન્ધ્યાવલેપાધિના-
યં ધ્યાત્વાધિગતા કલા ન યદિ કો રુન્ધ્યાદતોઽન્યઃ પુમાન્ ।
સન્ધ્યાકારિમહાગિરિ જલનિધિ બન્ધ્યાદ્ગણેશેશં
તં ધ્યાયેમ ભવાબ્ધિમદ્ય ભગવન્ સન્ધ્યાશુ નાગાનન ॥ ૮૬॥

શ્રુત્વા દૈત્યગણાવૃતં ત્રિભુવનં મત્વા પરાવધ્યતાં
ગત્વા કાશ્યપસૂનુતાં યુગબલાદ્ધત્વા રિપૂનઞ્જસા ।
હૃત્વા ભૂમિભરં સુરાન્ સ્થિરપદાન્ કૃત્વા પ્રથામાગમ-
ત્તત્ત્વાતીતમમું ગણેશમસકૃન્નત્વા ભવેયં કૃતી ॥ ૮૭॥

પૂર્વાદ્રિઃ શિખરોદિતસ્ય રુચિરશ્રીર્વાસરાધીશિતુ-
ર્ગૌરિણ્યમલે વિભાતિ તુ યથા દૂર્વાગ્રભાગસ્થિતે ।
ગીર્વાણેશખગેશમૌક્તિકમણિશ્રીર્વાબ્જરાગદ્યુતિઃ
શાપિત્ય તવાકૃતિઃ સ્ફુરતુ ધીકાર્વાહિતા મેઽનિશં (?) ॥ ૮૮॥

તુચ્છાત્યલ્પસુખાવહેષુ વિષયેવિચ્છાનુરોધાદ્ધમન્
કચ્છાપેતભવાત્રવાન્તરનિશપ્રચ્છાદિતાત્મા ચિરાત્ ।
ઇચ્છાતીતફલપ્રદં ગણપતિં ગચ્છામિ દેવં ગતિં
ચિચ્છાયામતિદિશ્ય સન્દિશતુ મે તચ્છાશ્વતં વૈભવમ્ ॥ ૮૯॥

સ્વં ત્રાતું ન ભવામ્બુધૌ નિપતિતં તન્ત્રાદિના પારયે

ગન્ત્રા ભાવ્યમતોઽન્તકસ્ય ચ મયા સન્ત્રાસનસ્યાન્તિકે ।
યન્ત્રારૂઢભિવાવશં ભમતિ યન્મન્ત્રાજગત્તં વિના
કન્ત્રાતારમુપૈમિ કો દુ ભવભીતં ત્રાતુમીષ્ટે ચ મામ્ ॥ ૯૦॥

સારાસારવિચારદૂરમનસં ઘોરાર્તિસન્દાયિસં-
સારાહિક્ષતિજાતમોહમગદઙ્કારાન્તરાનાશ્રિતમ્ ।
તારાનાથકલાધરાય ન ચિરાદારાચ્છરણ્યાર્થિનં
સ્ફારાપારકૃપામૃતાર્ણવરસેઽદરાનિમગ્ન કૃથાઃ ॥ ૯૧॥

॥ ઇતિ શ્રીનતિપદ્ધતિઃ ।

## શ્રીસમ્પ્રાર્થનાપદ્ધતિઃ

કાશાપસ્થિતતૂલજાલચપલાન્ લેશાન્ સુખાનાં ભજન્
આશાવેશવશાદ્ગણેશ વિવશઃ કેશાનજલં વહન્ ।
ઈશાપત્ય ચિરાત્ત્વદીયચરણાભ્યાશાવતીગોઽસ્મ્યહં
પાશાનાશુ વિમુચ્ય મેં દિશ ગતિં યા શાસિતા શાશ્વતી ॥ ૧૨॥

નિર્માયાવનિમણ્ડલે જનિમદાઃ કર્માધિકારં તતો
ધર્માદુદ્ગતિમપ્યધોગતિમથાધર્માદ્દદન્ચાયતઃ ।
દુર્માયાવશમેત્ય દારસુતભૂભૌદિલુબ્ધં કૃતઃ
શર્માભાસરતં કૃથાઃ કલિતનીતિમર્માધિકારાચ્ચ્યુતમ્ ॥ ૯૩॥

વેધા મામકકર્મસઙ્ક્રમવશાદાધાજનિં યાં તુ તાં
ત્રેધા પુત્રકલત્રવિત્તમમતાબાધાદદભ્રીકૃતામ્ ।
મેધાસઞ્જનનેન ભઞ્જય જવાદેધાંસિ વહ્નિર્યથા
સ્વે ધામન્યભિરખયાદ્ય વિષયેષ્વાધાવિતં મે મનઃ ॥ ૯૪॥

બુદ્ધિપ્રેરણતક્ષણેન ફલદાત્ સિદ્ધિપ્રવર્ષ જના
ત્વદ્ધિ પ્રાપુરબોધસન્તમસજા તદ્ધિ જાતદ્ધી ક્ષયાદઞ્જસા ।
યદ્ધિત્વા શરણં ન મેઽસ્તિ ભુવને તદ્ધિ ત્વદઙ્ઘ્રિદ્વયં
વિદ્ધિ પ્રાપ્તમિમં જનં ગણપતે સિદ્ધિપ્રદો મે ભવ ॥ ૯૫॥

તાપં ભૌતિકમુખ્યમેત્ય બહુવિક્ષેપં ભજન્માનસં
કોપં દુર્ધનિનાં મદોદ્ધતમધિક્ષેપં સદા મર્ષયન્ ।
ભો પઞ્ચાસ્યસુત ત્વમેવ ગતિરિત્યાપં ભવન્તં પરં

રૂપં દર્શય મેઽધુના ત્વમખિલવ્યાપન્નરક્ષાક્ષમમ્ ॥ ૯૬॥

દ્વેધા કર્મણિ ચિન્તિતે મયિ કૃપાસાધારણી ચેન્મહો-
ત્સેધાપારભવામ્બુધેસ્સપદિ માં બાધાકરાદુદ્ધર ।
ક્રોધાવેશવશોઽથ ચેન્મયિ તદા મેધાશિલાસન્દિતં
બોધાગાધમહાર્ણવે ઝટિતિ મામાધાય તુષ્ટો ભવ ॥ ૯૭॥

ઈહામાત્રતપોભરાનવિરતં ગેહાતિસમ્પીડિતા-
નૂહાશેહવિચારણાસ્વકુશલાનાહારમાત્રાર્થિનઃ ।
માહામાન્યદયાશા યદિ તુ નઃ સ્નેહાદુદીક્ષેસ્તદા
કા હાનિર્ભવતો ગણેશ ભવિતા નેહાયમસ્માનવ ॥ ૯૮॥

અત્યન્તાર્તિપરમ્પરોપહિતસંસૃત્યમ્બુધૌ ચિત્તવૈ-
મત્યં પ્રાપ્ય વિવેચનૈરવિદિતૌચિત્યં નિમગ્નં ચિરાત્ ।
નિત્યં મોહશતાપવિદ્ધમવશં ગત્યન્તરાનાશ્રિતં
ભૃત્યં માં ગણનાયકોદ્ધર તદૌન્નત્યં ચ સત્યં કુરુ ॥ ૯૯॥

અક્તં મોહમહાઞ્જનેન વિષયાસક્તં પ્રવૃત્તં દિવા-
નક્તં વિત્તમુતાદિભિર્દૃઢપરિષ્વક્તં ચ માં માયયા ।
સક્તં પુણ્યકણેન પાપપટલીયુક્તં નિષિક્તં મલે
ભક્તં પાદનખપ્રભાસલિલનિર્ણિક્તં ગણેશ ક્રિયાઃ ॥ ૧૦૦॥

જ્યાવલ્લીવ સરીસરીતિ ધમની યાવત્તનૌ ચાર્મણી
સા વધીવ વિનિશ્વસત્યવિકલૈર્મે વશ્યભાવં ગતઃ ।
તાવન્મત્કરણૈરકુણ્ઠગતિભિઃ વે વર્ત્મનિ સ્થીયતાં
જીવત્યાગભયેઽપ્યપૈદુ ન મતિર્ભાવત્કપાદામ્બુજાત્ ॥ ૧૦૧॥

॥ ઇતિ શ્રીસમ્પ્રાર્થનાપદ્ધતિઃ ।

## શ્રીમનસ્તૃપ્તિઃ

પ્રસ્તાત્માનમપારદુઃખનિચયૈર્ધ્વસ્તાખિલાતિ તુ માં
કસ્તાવદ્રચયિષ્યતીતિ ન હિ મે પ્રસ્તાવના કાપિ યત્ ।
યસ્તાક્ષભવાબ્ધિમાનજનતાહસ્તાવલમ્બપ્રદો
(૧)બસ્તારૂઢભવાગ્રજોઽત્ર ભવતિ ન્યસ્તા સમસ્તાપિ ધૂઃ ॥ ૧૦૨॥

૧। બસ્તારૂઢો મેષવાહનોઽગ્નિઃ ।

કંસારાતિચતુર્મુખેન્દુશકલોત્તંસાદયોऽપીશ્વરા
યે સામાન્યજનૈઃ સહાત્મદુરિતધ્વંસાશયોપાસતે ।
તં સાક્ષાત્ફલયિષ્યસે કિમિતિ ચેત્ સંસારિણામપ્રણી-
સ્તં સાધારણમાગમા જગુરતઃ સંસાધયામીપ્સિતમ્ ॥ ૧૦૩॥

મોહાખ્યામ્બુનિધી વિચિત્રવિષયગ્રાહાકુલે નિર્ભરો-
ત્સાહાદલ્પતરાતિનશ્વરસુખાલેદાત્પ્રનષ્ટાયુષઃ ।
ઊહાતીતપુરાણસત્કૃતપરીણાહાદિદાનીમમી
નીહારાચલકન્યકાતદુભુવં ગાહામહે ચેતસા ॥ ૧૦૪॥

બાલેન ક્ષણભગુરેऽપિ વિષયે લોલેન યદ્યપ્યસ-
છીલેનાઘમુપાર્જિતં તદુદિતામીલે સમાસેદુષિ ।
કાલે પાદયુગે મનો વ્યરચયં દાલેન્દુમૌલેર્યદિ
પ્રાલેયાનિ રવિર્યથૈવ વિદહેજ્જ્વાલેવ તૂલં શુચેઃ ॥ ૧૦૫॥

સુત્રામપ્રમુખૈશ્ચ યત્પદયુગં સત્રાશનૈઃ સેવ્યતે
પિત્રા પુત્ર ઇવ પ્રપઞ્ચ ઇહ ચામુત્રાપિ યેનેક્ષ્યતે ।
ચિત્રાકારમિદં વિભાતિ સકલં યત્રાહિત ભિત્તિવત્
સ ત્રાયીત ગણેશ્વરસ્ત્રિજગદાધિત્રાણદક્ષઃ સ્વયમ્ ॥ ૧૦૬॥

નિદ્રાલસ્યવશાન્નિશાદિવસયોભદ્રાય હીનોદ્યમઃ
ક્ષુદાનિત્યસુખાશયા ધુરિ દધન્મુદ્રાં દરિદ્રાહિતામ્ ।
સ્વદ્રાષિષ્ઠસુખાવહં શ્રિતજનાઘદ્રાવણં હા ચિરા-
દ્રાક્ષં ગણનાથમદ્રિતનયારુદ્રાત્મજાતં વિભુમ્ ॥ ૧૦૭॥

હૂતિર્દેવગણસ્ય સાધુષુ મખે ભૂનિર્ભવત્વસ્ય તે-
વીતિનશ્યતુ ષડિધા ભુવિ યથા સ્ફીતિર્ભવેત્ સમ્પદામ્ ।
જાતિઃ સ્વે ચરિતે યુતાસ્તુ ન ચ દુર્ની તિર્નૃપાણાં ન ચ
જ્ઞાતાતુ તે ગણેશ કૃપયા ભીતિઃ કચિન્મા સ્મ ભૂત્ ॥ ૧૦૮॥

ફલશ્રુતિઃ અષ્ટપ્રાસયુતં વિશિષ્ય પઠતામિષ્ટપ્રદં દેહિનાં
કષ્ટક્લેશવિનાશનં બહુવિધાનિષ્ટવ્રજચ્છેદનમ્ ।
નષ્ટસ્વાર્થિસમર્પણં સરસવિસ્પષ્ટપ્રમેયં ગણે-
શાષ્ટશસ્યશ્લોકશતં ચિરં વિજયતાં તુષ્ટઃ સ ચ સ્યાદ્વિભુઃ ॥ ૧૦૯॥

કવિનામ પ્રાતઃ પદ્યશતં પઠેદ્યદિ પુમાન્ જાતસ્પૃહઃ પ્રત્યહં
ખ્યાતઃ પુત્રકલત્રમિત્રવિભવોપેતશ્ચિરં મોદતે ।

ચેતસ્યેષ યદીહતે પદમદો યાતશ્ચ નાતઃ પતે
ગીતઃ સિદ્ધગણૈર્ગણાધિપપદં નીતઃ સુખં વિન્દતે ॥ ૧૧૦॥

શમ્ભાવાહિતચેતસો મુનિમણેઃ કુમ્ભાદુદીતાકૃતેઃ
કુમ્ભાદુહતયા કવેરસુતથા સમ્ભાવિતશ્રેયસિ ।
કુમ્ભાધીરપુરે વસન્ મધુરવાગ્ગુમ્ભાતિમાન્યઃ સુધી
જમ્ભારાતિરચીકરચ્છતમિદં શ્રીયજ્ઞવેદેશ્વરઃ ॥ ૧૧૧॥

શ્રીમત્કુમ્ભપુરે સતા ગણપતેર્ધામ સ્વયં ધ્યાયતા
પ્રેમ ખ્યાપયતાં કૃતં સુકદિના ધીમધુરસ્વામિના ।
ક્ષેમસ્થેમકરં ગણેશશતકં નામ પ્રસિદ્ધિં ભજ-
ત્વામન્વન્તરમાણવં ચ તદિદં કામપ્રદં દેહિનામ્ ॥ ૧૧૨॥

આદૌ મઙ્ગલશંસનં વિનયવાગ્ગુમ્ભો મનોનિગ્રહો
નિર્દેદો વિરતિઃ સ્વરૂપગુણચારિત્રં નતિઃ પ્રાર્થના ।
ચૈતસ્તુષ્ટિફલાભિધાનકવિનામાનીતિ ભિન્નક્રમ
રમ્યં પદ્યશતં દશાધિકમિદં ભૂયાદ્ બુધાનાં મુદે ॥ ૧૧૩॥

॥ ઇતિ શ્રીવિશ્વામિત્રકુલકલશપારાવારરાકાસુધાકરશ્રીમદ્રત્નખેટ-
શ્રીનિવાસ મખિવરસન્તાનપલ્લવેન શ્રીબાલચન્દ્રાર્યતનૂજેન
યજ્ઞવેદેશ્વરેણ કૃતં ગણેશાષ્ટોત્તરશતં (ગણેશશતકં) સમ્પૂર્ણમ્ ॥

Proofread by Sreenivasa Rao Bhagavatula

*Shri Ganesha Ashtottarashatam or shatakam*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*